# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – -२०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य-१** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – स्वामिनारायणवेदान्तः(S)** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – तैत्तिरीयोपनिषद्** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**

**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्या कार्या।**

१ ॐ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।।

२ स य एषोऽन्तर्हृदय आकाश। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः।।

३ ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च।।

४ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसम्। सुमेधाः अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्।।

**प्रश्नः २ शीक्षावल्ल्याः शान्तिमन्त्रं विलिख्य तद्भाष्यं लिखतु।**

**प्रश्नः ३ यथाभाष्यं दीक्षान्तप्रवतनं विस्तारयतु।**

**प्रश्नः ४ 'ब्रह्मविद् आप्नोति परम्' इति मन्त्रं सविस्तरं चर्चयतु।**

**प्रश्नः ५ आनन्दवल्ल्याः शान्तिमन्त्रं विलिख्य तद्भाष्यं लिखतु।**

**प्रश्नः ६ अधोलिखितेषु द्वयोः व्याख्या कार्या।**

१ असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति।।

२ यद्वै तत्सुकृतम् रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति। को ह्येवान्यात् कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवाऽऽनन्दयाति।

३ यतो वाचो निवर्तन्ते। अप्राप्य मनसा। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।।

४ ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।।

**प्रश्नः ७ ब्रह्मानन्दमीमांसा इत्यस्य निबन्धात्मकोत्तरं लिखत।**

**प्रश्नः ८ आनन्दवल्लीमधिकृत्य परमात्मनः सर्वकर्तृत्वं विवेचय।**

**प्रश्नः ९ भार्गवी वारुणी विद्या इत्यस्य निबन्धात्मकोत्तरं लिखत।**

**प्रश्नः१० परमात्मोपासकस्य अनुभवविशेषं यथाभाष्यं विवेचय।**

**प्रश्नः११ केषाञ्चन दशानामतिलघूत्तराणि देयानि।**

१ को वर्तते उरुक्रमः?

२ 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच।' कस्मिन् ग्रन्थे मन्त्रोऽयम्?

३ छन्दसामृषभः कः?

४ कस्मिन् वेदाऽन्तर्गता तैत्तिरीयोपनिषद्?

५ सत्यं प्रियं हितकरं च सूनृतं वचोऽर्थात्?

६ मनोमयः, अमृतः, हिरण्मयः इत्यादिशब्दप्रयोगाः कस्य कृते?

७ 'आनन्दं ब्रह्मणो विद्वान्' इत्यत्र ब्रह्मपदार्थः कः?

८ 'ब्रह्मविदाप्नोति परम्' इत्यत्र परमार्थात्?

९ सत्यं ज्ञानमनन्तं...........।

१० 'अहं वृक्षस्य रेरिवा' इति कस्य वचनम्?

११ 'ब्रह्मणा विपश्चितेति' इत्यत्र विपश्चिदर्थात्?

१२ रसो वै कः?

१३ भूतिर्नाम.............।

१४ स्वामिनारायणभाष्यकारः कः?

१५ 'यतो वा इमानि भूतानि जायन्ते। तद्ब्रह्मेति' इत्यत्र ब्रह्मपदार्थः कः?

***